श्री दुर्गा आर्या स्तवं

श्री दुर्गा आर्या स्तवं

वैशंपायन उवाच |
आर्यास्तवं प्रवक्ष्यामि यथोक्तमृषिभिः पुरा |
नारायणीं नमस्यामि देवीं त्रिभुवनेश्वरीं || 1 ||

त्वं हि सिद्धिर्धृतिः कीर्तिः श्रीर्विद्या सन्नतिर्मतिः |
संध्या रात्रिः प्रभा निद्रा कालरात्रिस्तथैव च || 2 ||

आर्या कात्यायनी देवी कौशिकी ब्रह्मचारिणी |
जननी सिद्धसेनस्य उग्रचारी महाबला || 3 ||

जया च विजया चैव पुष्टिस्तुष्टिः क्षमा दया |
ज्येष्ठा यमस्य भगिनी नीलकौशेयवासिनी || 4 ||

बहुरूपा विरूपा च अनेकविधिचारिणी |
विरूपाक्षी विशालाक्षी भक्तानां परिरक्षिणी || 5 ||

पर्वताग्रेषु घोरेषु नदीषु च गुहासु च |
वासस्ते च महादेवि वनेषूपवनेषु च || 6 ||

शबरैर्बबरैश्चैव पुलिंदैश्च सुपूजिता |
मयूरपिच्छध्वजिनी लोकान् क्रमसि सर्वशः || 7 ||

कुकुटैश्छागलैर्मेषैः सिंहैर्व्याघ्रैः समाकुला |
घंटानिनादबहुला विंध्यवासिन्यभिश्रुता || 8 ||

त्रिशूली पट्टिशधरा सूर्यचंद्रपताकिनी |
नवमी कृष्णपक्षस्य शुक्लस्यैकादशी तथा || 9 ||

भगिनी बलदेवस्य रजनी कलहप्रिया |
आवासः सर्वभूतानां निष्ठा च परमा गतिः || 10 ||

नंदगोपसुता चैव देवानां विजयावहा |
चीरवासाः सुवासाश्च रौद्री संध्याचरी निशा || 11 ||

प्रकीर्णकेशी मृत्युश्च सुरामांसबलिप्रिया |
लक्ष्मीरलक्ष्मीरूपेण दानवानां वधाय च || 12 ||

सावित्री चापि देवानां माता मंत्रगणस्य च |
कन्यानां ब्रह्मचर्या त्वं सौभाग्यं प्रमदासु च || 13 ||

अंतर्वेदी च यज्ञानामृत्विजां चैव दक्षिणा |
कर्षकाणां च सीतेति भूतानां धरणीति च || 14 ||

सिद्धिः सांयात्रिकाणां तु वेला त्वं सागरस्य च || |
यक्षाणां प्रथमा यक्षी नागानां सुरसेति च || 15 ||

ब्रह्मवादिन्यथो दीक्षा शोभा च परमा तथा |
ज्योतिषां त्वं प्रभा देवि नक्षत्राणां च रोहिणी || 16 ||

राजद्वारेषु तीर्थेषु नदीनां संगमेषु च |
पूर्णा च पूर्णिमा चंद्रे कृत्तिवासा इति स्मृता || 17 ||

सरस्वती च वाल्मीके स्मृतिर्द्वैपायने तथा |
ऋषीणां धर्मबुद्धिस्तु देवानां मानसी तथा || 18 ||

सुरा देवी तु भूतेषु स्तूयसे त्वं स्वकर्मभिः |
इंद्रस्य चारुदृष्टिस्त्वं सहस्रनयनेति च || 19 ||

तापसानां च देवी त्वमरणी चाग्निहोत्रिणां |
क्षुधा च सर्वभूतानां तृप्तिस्त्वं दैवतेषु च || 20 ||

स्वाहा तृप्तिर्धृतिर्मेधा वसूनां त्वं वसूमती |
आशा त्वं मानुषाणां च पुष्टिश्च कृतकर्मणां || 21 ||

दिशश्च विदिशश्चैव तथा ह्यग्निशिखा प्रभा |
शकुनी पूतना त्वं च रेवती च सुदारुणा || 22 ||

निद्रापि सर्वभूतानां मोहिनी क्षत्रिया तथा |
विद्यानां ब्रह्मविद्या त्वमोंकारोऽथ वषट् तथा || 23 ||

नारीणां पार्वतीं च त्वां पौराणीमृषयो विदुः |
अरुंधती च साध्वीनां प्रजापतिवचो यथा || 24 ||

पर्यायनामभिर्दिव्यैरिंद्राणी चेति विश्रुता |
त्वया व्याप्तमिदं सर्वं जगत् स्थावरजंगमं || 25 ||

संग्रामेषु च सर्वेषु अग्निप्रज्वलितेषु च |
नदीतीरेषु चौरेषु कांतारेषु भयेषु च || 26 ||

प्रवासे राजबंधे च शत्रूणां च प्रमर्दने |
प्रयाणाद्येषु सर्वेषु त्वं हि रक्षा न संशयः || 27 ||

त्वयि मे हृदयं देवि त्वयि चित्तं मनस्त्वयि |
रक्ष मां सर्वपापेभ्यः प्रसादं कर्तुमर्हसि || 28 ||

इमं यः सुस्तवं दिव्यमिति व्यासप्रकल्पितं |
यः पठेत् प्रातरुत्थाय शुचिः प्रयतमानसः || 29 ||

त्रिभिर्मासैः कांक्षितं च फलं वै संप्रयच्छसि |
षड्भिर्मासैर्वरिष्ठं तु वरमेकं प्रयच्छसि || 30 ||

अर्चिता तु त्रिभिर्मासैर्दिव्यं चक्षुः प्रयच्छसि |
संवत्सरेण सिद्धिं तु यथाकामं प्रयच्छसि || 31 ||

सत्यं ब्रह्म च दिव्यं च द्वैपायनवचो यथा |
नृणां बंधं वधं घोरं पुत्रनाशं धनक्षयं || 32 ||

व्याधिमृत्युभयं चैव पूजिता शमयिष्यसि |
भविष्यसि महाभागे वरदा कामरूपिणी || 33 ||

मोहयित्वा च तं कंसमेका त्वं भोक्ष्यसे जगत् |
अहमप्यात्मनो वृत्तिं विधास्ये गोषु गोपवत् || 34 ||

स्ववृद्ध्यर्थमहं चैव करिष्ये कंसगोपतां |
एवं तां स समादिश्य गतोंतर्धानमीश्वरः || 35 ||

सा चापि तं नमस्कृत्य तथास्त्विति च निश्चिता |
यश्चैतत्पठते स्तोत्रं शृणुयाद्वाप्यभीक्ष्णशः |
सर्वार्थसिद्धिं लभते नरो नास्त्यत्र संशयः || 36 ||

इति श्रीमहाभारते खिलभागे हरिवंशे विष्णुपर्वणि तृतीयोऽध्याये आर्या स्तवं ||